
२६ मपिनास्तितथापिकापट्येनलोकसंग्रहार्थंभगवद्दासस्वरूपत्वेन
करणेनभक्तिसाधनत्वेनैवतत्कृतिरुचितेतिनस्वर्गादिफलंभक्ता
नां।ननुश्रीमदाचार्याणामुपदेशकर्तृत्वंप्रवर्त्तकत्वंचोक्तं।कर्तृ
कत्वंचोक्तं।यदुक्तंप्रवर्त्तकत्वेनतदपिगौणतयातत्कथंतत्राहुः।
पूर्णानंदःपूर्णकामः।अयंभावः।कर्मकरणंतुनिःकामसकाम
भेदेनतद्द्विधाभवति।तत्रनिःकामस्यकर्मणःफलंचित्तशुद्धि
द्वाराज्ञानप्राप्तिःकदाचित्तद्द्वारामर्यादाभक्तिस्तयोःपरमफलं
भक्तिरससायुज्यं॥तत्रगणितानंदमज्ञानमेवनतुपूर्णानंदरसा
नुभवः।एतेतुपूर्णानंदाः।अतःकर्तृत्वंनोक्तं।प्रयोजनाभावा
त्॥सकामस्यफलंतुच्छमेव।एतेत्वलौकिकपूर्णकामाः।तेनत २६

स्यकर्तृत्वमसंभावितमेव॥एतेनोभयस्याप्यकर्तृत्वंसिद्धं।यत्कु
र्वंतितत्सवर्लंकत्वेनैवनाभ्युपैतिसर्वंसुष्ठुं।ननुभक्तिसाधनत्वे
ना ३ नकृतानामपिकर्मणांचित्तशुद्धिद्वाराज्ञानवैराग्यमेवफलंश्रूयते।
साक्षाद्भक्तिसाधनरूपत्वंकथमुच्यतेतत्राहुःवाक्पतिः।वाग्रू
पाश्रुतिस्तस्याःपतिः।अयंभावः।कर्मादिकंयत्क्रियतेतद्भगवदा
ज्ञयाक्रियते॥सर्वत्रप्रमाणरूपत्वात्वेदानामपिभगवदाज्ञा
प्रमाणं॥यतस्तदाज्ञयैवतन्निश्वासरूपेणोत्पत्तिस्तेषां।तेनभ
गवदाज्ञयोरप्यास्यरूपत्वमुक्तंभवति॥एवंसत्याचार्याणा
मपिभगवदास्यरूपत्वाद्वाक्पतित्वेन[illegible]तिनियंतृत्वेनैतदा श्रु २
ज्ञयाकृतस्यकर्मणःभक्तिसाधनत्वंसिद्धंभवतिनान्यफलसा

वेदाज्ञानियंतृत्वमुक्तंभगवदाज्ञायाश्चवाग्रूपत्वेनबाधश्यास्यएव
सत्वादाज्ञाया ३

गी २

२९ गी २
धनत्वमिति सूच्यते। ननु यागादौ तत्र देवतोद्देशेनाहुतिर्दीयत
इति तांस्तद्भोगैस्ते फलदाश्चापि ता एव संभवंतीति तत्केन भगव
दनुग्रहैकसाध्यत्वाद्देवादिसाध्यत्वाभावात्तत्कर्मणः फलं कथ
मित्यस्तत्राहुः॥ विबुधेश्वरः॥ सर्वेषां तेषामपीश्वरः नियंतेति।
भगवानेव स्वविभूतिरूपत्वेन फलभोगं करोतीति स एव फल
दाता तेन तद्विभूतित्वेन कृते कर्मणि भक्तिरेव सिध्यति न पृथग्दे
वतात्वेनेति भावः। अत एवोक्तं यस्य विभूतिर्भवति तस्य संपाद
यतः प्रभोरिति युधिष्ठिरेण राज्ञा एतेन तत्संबंधिविभूतिज्ञाने
न कृते॥ नान्यत्वप्रसंगोऽपीति भक्तैः फलतीति पृथग्देवताभिमा ऽन २ व २
नेन कृतेन फलतीति स्पष्टमेवेति। अत्राप्याचार्याणां पुरुषोत्त २९

x श्चाग्निमुखा वै देवा इत्युक्तत्वा १

त्तु१

मास्यत्वेनद्विबुधेश्वरमुक्तमिति तन्नियंतृत्वेन फलदातृत्वाद्भ
क्तिरेव फलमिति भावः। ननु भगवदाज्ञयैव भक्तिसाधनत्वेना
पि क्रियमाणकर्मणिर्जन्मांतरसहस्रेष्वित्यादिवचनादनेक
जन्मसहस्रानंतरं भक्तिः सेत्स्यतीति कथं पुष्टिफलं भगवदंगी
कारमात्रेणैव शीघ्रं भवेत्तत्राहुः। लक्ष्मनामसहस्रस्य वक्ताभ
क्तपरायणः। भक्त्याचारोपदेष्टार्थनानावाक्यनिरूपकः॥२०॥
साक्षात्श्रीलक्ष्मसहस्रनाम्नां वक्ता। एतेन फलरूपसाक्षात्स
दानंदस्वरूपस्य नाम्नामपि तद्रूपत्वात्तन्नामार्थरूपभगव
त्स्वरूपानुसंधानेन तच्छ्रवणपाठोभ्महस्रं ये स्तुपठितैः। पाठितं
स्याच्छुकोक्तमित्युक्तत्वात्सहस्रणि श्रीभागवतोक्तफलरूपत्वे

नशीघ्रमेवपुष्टिफलंभवतीतिसूचितं।एवंसतिस्वकीयानामेतदंगीकारा
नंतरमेतन्नामश्रवणप्रागादिकमेवकर्त्तव्यंमनामदितिफलितार्थः॥
तथापियत्कुर्वंतितत्कर्मकर्त्तव्यमितिभगवदाज्ञप्तत्वेन॥अ
न्यथातदाज्ञयाऽकरणात्स्वामिद्रोहोभवेदितिलौकिकवैदि
केषुकापट्यात्कर्मकरणंनतुसहजधर्मत्वात्॥तत्रापिभग
वदर्थमेवतदुद्देशःनतुफलोद्देशः।अन्यथानंतरंभगवत्
श्रवणपक्षेऽपिबहुकालविलंबोभवेत्फलप्राप्तौ।तत्रवि
षयव्यवस्थापितद्वयविगमेपिसंभ्रमोभवति।अतएववय
थाफलप्राप्तौविलंबोनभवेत्तथाततउद्धृतसारभूतनाम्नां
वक्तार्थैःसंहरणंश्रुकामतमेवपरिभिन्नभवेत्॥एवंसतियत्रफ
त्वनंगप्रसंगस्यात्
एवंसत्युचितमेवश्रीमत्पदानंदवेतयद्वा
द्वादशस्कंधात्मकसंपूर्णं श्री ५

सहानेश्रीभागवतश्रवणेपिकालविलंबासहिष्णुस्तत्रकर्मादि
जनितकालविलंबासहिष्णुत्वेकिंवाच्यमितिभावः ननुभक्ता
र्थमेतावत्करणेकिंप्रयोजनकंतत्राहभक्तकृपरायणः तेषुतत्प
रःप्रपन्नइवायथायथाभक्ताःप्रपन्नाभवंतितथाएतेपियथा तथा ४
मांप्रपद्यंतेतिवचनात्तेषुप्रपन्नास्तत्फलंददामीतिभावः।यद्वा॥
भक्ताएवपरंआयनंस्थलंयस्येति॥नित्यंभक्तांतःकरणेतिष्ठ
ति।तेनतत्फलदानेनस्वस्यापिफलभोगोभवतीतिज्ञात्वैवदा द्वि ४
नमित्यपिसूच्यते।ननुपूर्वंकर्मकृतितात्पर्यमुक्तंशीघ्रंफलदा पश्चात् २
नहेतुरप्युक्तः।परंतुपूर्वेभक्त्याचारोपदेष्टृत्वमुक्तंतेनउपदेशानं
तरंतत्क्षणानात्तावात्कथमाचरणंभवेत्तत्राह॥भक्त्याचारोप

परंतुतत्पाठकरणेपितदुक्तधर्मानवबोधात्तदाचरणाभावेनप्रपत्त्यसंभवा
त्पुष्टिमार्गीयभक्ताचारानधिकारात्कथंफलंभवेत्तत्राहुः॥२३१यंद्वितीयोर्थः

भक्त्याचारोपदेशार्थं तथाचरणोपदेशार्थं १

३१ देशार्थेति॥ तदाचरणज्ञानार्थं नवरत्नं कि वक्ष्यन्त्यादिवाक्यानां
निरूपकः। एतेन तदुक्तप्रकारेण भक्त्याचरणं कर्त्तव्यमिति सू धर्मी २
चितं। नन्वेतदुक्तप्रकारकृतिकरणे नाथः किं न वेत्तीत्याहुः॥
स्वार्थोज्झिताखिलप्राणप्रियस्तादृशवेष्टितः। स्ववशासापेक्षनाशे
षसाधनः सर्वशक्तिधृक्॥२९॥ स्वार्थं स्वस्मैवार्थमुज्झितं अखि
लं यैः। स्वार्था एवोज्झिता अखिला यैरिति वा ते प्राणादपि प्रिया भ
वंति तेषां स्वयं वा प्रियो भवति। अत्र प्राणप्रियत्वकथनं स्वाय
मात्रायोवगम्यते। एवं स्ववासेन सर्वलिभानगवस्सेवादिकं क
र्त्तव्यमित्याकूतं। तत्करणेन सर्वत्युक्ता सर्वात्मनोप्रपन्ना भवं
ति। आचार्याणां नक्लेशेनावकृतिस्तफलसंबंधार्थं फलस ३१
प्रपत्त्यनंतरं प्राणप्रियत्वकथने न प्रपत्तिजनितरूपा ततः स्नेहादिना
पुष्टिभक्त्याचाराधिकारिणो भवंतीति सूचितं किंच १

२१ वंधे सति प्रभोरपि महानूँसंजनितसंतोषो भवति। येन प्रभुसं
तोषः स एतेषां प्राणप्रियो भवति तत्र कः संदेह इति भावः। कि
च स्वाज्ञा न करणे नापि सेवकः प्रियो भवतीत्यपि ऊह्यते। ननु
कथं ज्ञायते सर्वभक्तैस्पृक्तं तत्राहुः। तादृश वेष्टितः। तादृशैः
पूर्वोक्तैरेव निरंतरं वेष्टितः। निरंतरं निकटे स्थितैस्तैर्दे
व भवेद्यदा सर्वस्पृक्तं भवेदित्यर्थः। ननु निरंतरमेभिः सेवाकरणे
एवं तत्काले कर्मादीनां करणावकाशो न सम्पद्यते तदा तदकर
णे जनितदोषप्रसक्त्या तद्भक्तैरपि सदोषत्वप्रसंगेन साधनस
दुष्टत्वेन कथं तत्फलासिद्धिस्तत्राहुः। स्वदासेति। स्वदासार्थं कृता
नि प्रकटीकृतानि ऽपपुष्टोषानि साधनानि स्वमार्गियानि येन। एवं

तत्साध्यभ
क्तै २

३२

सति दासानां साधनानि पूर्वोक्तानि न। कींतु नवरत्न भक्तिवर्द्धिनी
विवेकधैर्याश्रयाद्युक्तानि। तान्यवश्यकर्त्तव्यानि यतस्तदकर
णे मार्गाद्विपतेदतः कर्मादीनां कापेक्षा न कर्त्तव्यत्वादकरणेपि
दो ४ न दोष इति त्वदुक्तदूषणानवसरः। यद्वा॥ अत्र छलपदेनैवं प्रति
भाति। यत्स्वमार्गीयान्यपि निजविरहज्ञापकानि मत्वा तदर्थं स्वयमेव
तानि लोकेषु भक्तानां ज्ञापनार्थं कृतानि पुनः स्वस्मिन्नेवस्थापि
तानि यतस्तानि तत्रैव तद्रूपं तेनान्यत्रेति। एवं सति य एतदा
श्रयाः केवलमाचार्यविश्वासेनाचार्यकृपैकसाधनां निरंतरं त
त्सेवापरास्तिष्ठंति तेषां स्वदासानां स्वबलेनैव शीघ्रं फलरूप
भक्तिसिद्धिं कुर्वंति॥ न तेषां पूर्वसाधनापेक्षां कुर्वंतीति। यदि

३२

चेत्कुर्वंति तदा स्वयमेव साधनानि दत्वा फलं प्रयच्छतीति ज्ञाप
नायोक्तं स्वदासेति। अथवा दासानां सेवैव सुखमेति तन्निश्चयात्त
थैव तेषां प्रवृत्तेः। तानि स्वत एव भवंतीत्याचार्यस्वरूपसेवातन्नि
ष्ठाविश्वासेनैव सर्वं भवतीति सर्वं सुखमतः सेवात्ववद्रूपकार्ये
वोक्त यथा फलसंभवात्।। एतेन स्वसेवयैव तानि सिद्धानि भवं
ति न पृथक्कार्यत्वमपि सूचितं।। एवं सति यत्र स्वमार्गीयफलप्राप्त्यभावे
वत्साधनाभावान्न प्रतिबंधस्तत्र सेवापराणां कालोकर्माकरणे
न कुतस्तरां दोषसंभावनागंध इति ज्ञापितं।। यदि कदाचिद्बहि
र्मुखस्य शंका भवेदेव तदा मत्कर्मकुर्वतामित्यादिवचनैः सापि
दूरी भवतीति सर्वमनवद्यं।। ननु एवं साधनाभावेनापी फलदाने

॥३२॥ किंसामर्थ्यं तत्राहुः। सर्वशक्तिधृगिति। सर्वशक्तिभिः कृत्वा सर्वक
रणसमर्थः। एतेन साधननैरपेक्ष्यं उक्तं। नांफलदान एव न किंतु
सर्वकार्यमात्रे तद्विनैव सर्वकर्तुं समर्थः। एवं सति भक्तानां
यदपेक्षितं तत्सर्वं स्व च्छयैव श्री कुर्वंतीति भावः सूचितः। य
द्वा यथा सर्वाशक्तय स्तथा प्रसादरूपापि शक्तिरस्तीति यया प्रगटन्तेति
एतेन तच्छक्त्यैव तादृक्चतुरभावोदयेनैव फलं प्रयच्छंति ना
न्यसाधनापेक्षेति ज्ञापितं॥ तेन यथा यथा भावप्राचुर्यं तथा त
थाफलसांमुख्यमिति भावः सूचितः। ननु भक्तार्थं एतत्स्वमार्गि
यं सर्वं प्रकटितं। तत्सर्वस्य प्रादुर्भावसमये स्वव्यतिरेकादन्यत्र
सामस्त्येन सर्वज्ञानाभावादस्मकं पंज्ञास्यंतितत्राहुः। अनुवितक्ति

अन्यत्रसामस्त्येन

ममेयबलेनैतत्सर्वं
वोताविते प्रादुर्भा
वीसमये

॥३३॥ पं

अप्राकृमायादन्यत्राप्तिस्वरूपेण विर्भावकरणभावान्नैतादृशरूपत्वमिति सूचितं भवति
अपंवज्ञे जीतोऽपिरेव भवतीति तत्स्वरूपं एव प्रकटः। यथाश्राचार्यस्वरूपं पूर्वोक्तमलौकिकधर्मस
हितमेव पठ्यतेति ३

प्रचारैककृते स्वापत्यकृतिमान्। स्ववंशे स्थापिताशेषस्वमाहात्म्यः स्मयापहः॥२२॥ तु विभक्तेषु यथाग्रेपि भक्तिप्रचारो भवेत्तदर्थमेवान्वयकर्ता। अत्र स्वान्वयपदेनैवं प्रतिभाति॥ स्वमार्गीयं संपूर्णज्ञानं स्वव्यतिरिक्तेन भवेदेव भक्तानामुद्धारस्त्वेतत्तु ज्ञानेन न सर्वथा कर्त्तव्यमेव। सर्वदा भगवद्विप्रयुक्तत्वेन स्वस्थितिरप्यत्राशक्येति तत्सर्वं विचार्य भगवदभिप्रेतमपि कर्त्तव्यमिति भगवदभिप्रेतत्वात्स्वान्वयमेवाग्निकुमारं स्वयं साक्षादग्निरूपेणैव प्रकटमकरोदिति स्वास्यं प्रादुर्भूतं चकारेति पूर्वमुक्तत्वादत्र च तदग्निरूपत्वद्योतकस्वपदोपादानादवगम्यते॥ एतेनाग्निकुमारादन्यत्राग्निस्वरूपेणाविर्भावकरणाभावान्नैतादृशरूपत्वमिति सूचितं भवति॥ अयं स्वश्र-

वमे २

३४ र्जातोग्निरेवभवतीति तत्स्वरूप एव प्रकटः यथाचार्यस्वरूपं पूर्वो
क्तालौकिकधर्मसहितमेवाग्निकुमारस्वरूपमितिज्ञेयं किंच॥॥
अपितु पश्चाद्विद्यमानदशायां अयः शुक्रावहो विधिर्येन सः अन्व
यः पुत्रः कथ्यते। एतेन यथाचार्याः सर्वेषां शुक्रावहस्वरूपास्तेपिपू
वसर्वेषां तत्कालानां शुक्रावहः स्वरूपोग्निकुमारः। स तु साक्षात्स्वयमे
व प्रभुः। अतः स्वाभिप्राये लौकिकं सान्वयपक्षदिति॥ एवं सति सर्वेषां
ज्ञानेन निःप्रत्यूहा फलसिद्धिः सिद्धा। ननु तत्रान्वयस्य करणमुक्तं ते
नौरसत्वं न च विष्पति तदन्वावे न तद्रूपत्वमपि कथं तत्राहुः।
पिता पितृत्वेन पितुः पुत्र इति ज्ञापितं न तु पितृपुत्रत्वेपि लोके
तत्तनयोः साम्यं न दृश्यते तत्राहुः। स्ववंश इति स्ववंशेग्निकुमार ३४

तेनात्मा वै जायते पुत्र इति वाक्याद्यादृ
शः पिता तादृश एव निरूपितं २

एवस्थापितं अशेषंस्वमाहात्म्यं पूर्वोक्तं [illegible] तादृशं सःतेन तदा
त्मत्वेनस्थितं। ननुएव मदशेषमाहात्म्यस्थापनेन सर्वेषामाश्चर्यं भ
वति तत्राहुः। स्मयोपहा॥ ननुकेनप्रकारेणाश्चर्यं दूरीकुर्वंति तत्रा
हुः। पतिव्रतापतिः पारलौकिकैहिकदानकृत् निगूढहृदयो
नन्यभक्तेषु ज्ञापिताशयः॥२३॥ अत्र पतिशब्देन सेव्यपतिः स्यादि
त्युक्तस्वरूपधर्मसहितएवपतिर्नाम इति सूच्यते। आचार्या
स्तु तादृशधर्मयुक्ता एव॥ अतएव तादृशोपत्यौ व्रतं अन्येनैवव्रतं
तद्व्यतिरिक्तं अन्यत्किमपिनास्तीति व्रतं यस्याः सा पतिव्रता त
स्याः पतिः। एतेनयाएवं अनन्यव्रतेनाचार्यस्वरूपसर्वात्मना
प्रपन्ना तस्यास्तथारूपएवपतिः। पूर्वोक्तधर्मसहितपतित्वंत

पेन १

३५ भप्रकटीकरोति। तत्प्रकटनं तु अन्यभावेभ्यो रक्षणं स्वस्वरू-
पज्ञानपूर्वकं। स्वस्मिन्सर्वात्मभावकरणं च तेन सर्वोत्तमत्वं अ-
लौकिकस्वरूपत्वमेव पतिव्रतायाः सिद्धं भवतीति सूचितं। एवं स-
भा ४ ति यत्र एवं अन्यसंबंधयुक्ताॅ अपि स्वपाणिसंबंधमात्रेणैव ता-
दृशान्भाविनयत्सर्वोत्तमत्वाऽलौकिकत्वकरणं तस्य माहात्म्यस्था-
पनं किमाश्चर्यमिति स्मयापहत्वमप्येवं सम्यक् सिद्धमेवेति भावः
॥ किंच ॥ पतिव्रतायाः सर्वोत्तमत्वनिरूपणेन क्षेत्रस्यापि सर्वोत्त-
मत्वात् क्षेत्रकृततारतम्यसंभावनापि नास्तीत्यपि ज्ञापितं।
ननु पतिव्रताया एवमलौकिकत्वेपि बहिस्तु लौकिकत्वमेव दृ-
श्यते तत्राहुः। पारलौकिकैहिकदानछलं॥ यद्यपि आचार्यम् ३५

^ हेतुकमेव तत्र साक्षात्स्वरूप एव प्रकटे स्वान्वयेऽशेषमाहात्म्यस्थापने ५

तिरिक्तंपतिव्रतायाऐहिकपारलौकिकंवाकिमपिवांछितंनास्ति
।तथापिस्वमार्गीयंपारलौकिकंभगवत्संबंधरूपं॥ऐहीकंतत्फल
रूपसेवार्थंस्वान्वयादिरूपंअतस्तदानकर्त्रीस्वमार्गेभगवत्सेवा
यांआवश्यकत्वादिति।५६॥आचार्यव्यतिरिक्तंअन्यत्रवांछि
तं।तथापितुविभक्तिप्रचारेकष्टतएवतदानष्ठतु॥एवंसति
हि ताद्दशामेकमपिपारलौकिकमेवेतिनलौकिकत्वगंधोपि।अत
एवोभयोरप्येकरूपत्वमेवेतिज्ञापनार्थमेवैकपदंदत्तं।एवंचे
दन्येपिसर्वात्मनाऽनन्यत्वेनप्रपन्नास्तेषामपिउभयंदानक
र्त्तीतिसूचितं॥नन्वेषांकदाद्दास्यतितत्राहुः।निगूढहृदयः॥११॥
इदंतुनज्ञातुंशक्यतेनहिश्वरेच्छाज्ञेयाभवतिकस्यापि॥ननु।

वे१

३६ कस्यापिज्ञातुंशक्यंवानवेतितत्राहुः॥अनन्यभक्तेष्विति॥येएता
दृशाअनन्यास्तेषुज्ञापितआशयोयेनतेरपिस्वयंनज्ञातः॥
किंत्वेतत्ज्ञापितएव।परन्तुतादृशास्तेदुर्लभाएवेत्यग्निकुमा
रेष्वेवाशयोज्ञापितः।नान्येष्वितिज्ञातंभवति।ननुअनन्यभक्तानांतुएतेष्वाश
योज्ञापितःसाधारणानांतुबहुविधमार्गस्यकृतत्वात्तत्रतत्रभ्रमरूपोमोहःकदा
चित्तिष्टेत्तदासर्वोत्तमत्वंनस्यात्तत्राहुः।उपासनादिमार्गातिमु
ग्धमोहनिवारकः।भक्तिमार्गेसर्वमार्गवैलक्षण्यानुभूतिकृत्॥
२४॥उपासनादिमार्गैरतिमुग्धानांमोहस्यनिवारकः।ए
तद्यथातथाभक्तिहंसेनिरूपितमितिसर्वमवदातं।एतेनस्व
मार्गस्यसर्ववैलक्षण्येविलक्षणेइतिज्ञापितंभवति।ननुसर्ववै ३६

अथवा॥ भक्तानामपि तदनुभवकृत् ३

क्षणविलक्षणत्वं कथं ज्ञायते तत्राहुः। भक्तिमार्ग इति॥ स्वमार्गे स
र्वमार्गेभ्यो यद्वैलक्षण्यं तदनुभवं प्रत्यक्षं स्वयमेव करोति तदास
प्रमाणं कुतो मृग्यं॥ तद्वैलक्षण्यानुभवस्तु स्वमार्गोक्तफलस्य मं
त्रोपासनादिविधिनिरस्पृष्टत्वेन तादृशस्यैव स्वसर्वस्वैकपनात्त
त्फलस्य सर्वेंद्रियरसास्वाद्यत्वेन भोगकरणं॥ एवं सत्येवंप्रकारक
फलानुभवस्य मंत्रोपासानादिविधिनिरस्पृष्टत्वेनै मर्यादामार्ग
विधिनिरस्पृष्टत्वं फलस्य भवतु। परंतु तन्मार्गेपि द्वारेण मार्गः सर्व
धर्मविधिरहितः सर्वधर्मानित्फक्तोस्ति तत्र विधिराहित्येन स्पृष्टो
भविष्यति तत्राहुः॥ इत्थप्रकारेण मार्गोपदेष्टा श्रीलक्ष्महार्दवित्॥
प्रतिक्षणनिकुंजस्थलीलारससम्पूरितः॥२५॥ मर्यादामार्गीये

त्व ४

तादृशस्यैव स्वसर्वस्व
त्व कथनात्

महदुर्ले
फलं॥ ननु
तन्मार्गे वि
धेर्नियाम
कत्वेन ५

शरणमार्गो द्वितीयः शरणमार्गस्तस्मान्मच्छरणं गोष्ठं मन्नाथं म
त्परिग्रहमित्युक्तपुष्टिमार्गीयशरणमार्गः । तस्यनृसिंहेभ्योभिर्
द्विनोपदेशकर्त्राएतेनास्मिन्मार्गे शरणमार्गोपि भिन्न एवेति सू
चितं ॥ तेन मर्यादामार्गीयशरणेनाप्यस्पृष्टत्वेनैव फलानुभवं
कुर्वंतीति प्रमाणपूर्वकं स्पष्टीकृतं ननु तस्मान्मच्छरणमित्यादि
नाशरणमार्गस्तूक्त एव । एतेषां पुनर्भिन्नत्वनिरूपणे को हेतुस्त
त्राहुः ॥ श्रीकृष्णहार्दवित् ॥ सदानंदफलरूपस्य हार्दविदिति । अ
यमभिप्रायः । श्रीकृष्णः साक्षात्फलरूपत्वेन भक्तानां साक्षात्फलं
दातुमेव प्रकटः तदुक्तं श्रीदेवं शरणं प्रपन्नानवेयुस्तदा तदान
योग्यतानवेन्मान्यपा । तद्दानेन स्वस्यापि तद्रसानुभवः सिध्य ।

ति। तदर्थमेवाचार्याणां प्राकट्यं कृतं॥ अतो यदाचार्याः मर्यादामा
र्गभिन्नत्वेन स्वमार्गीयप्रकारेण न निरूपयेयुस्तदा तत्तज्ज्ञापना
भावादितन्मार्गियप्रकारस्य तन्मार्गीयप्रकारस्य च प्रकारेण साम्ये
न भक्तानामेकत्वज्ञानेन मुख्यतया सर्वात्मभावरूपा स्वमार्गीयप्रका
रणप्रपत्तिर्न भवेदेव। तदा तत्फलभोगयोग्यतापि न सिध्यति। ते
न भगवदभिलषितमपि न भवेदतस्संवेभ्यो ऽकल्पहार्दज्ञात्वेन तद्भि
न्नत्वनिरूपणमिति भावः। ननु कथं ज्ञायते एतद्भिन्नत्वनिरूप
णे तज्ज्ञानेन तत्र प्रपन्नानां फलानुभवः सिध्यतीति तत्राहुः। प्रति
क्षणनिकुञ्जस्थेति। एतेन ये भक्ता लीलास्थास्ते इदम्मार्गप्रपन्ना
एवैं सिध्यति नान्यदिति भावः सूचितः। एवं सति आधुनिकास्त्र
नान्यमार्गप्रपन्ना एव भवन्तीति सुष्ठूक्तं तथेति। किंच दृश्यं लीलात्व लौकिकी तत्सं
बन्धिभक्ता अपि तादृक्शरणे न प्रपन्ना एव भवन्ति तदा तदनुभवोपि सम्पादितो नैतदतिरिक्तमार्गी
यैश्चोपि तेषां अन्यथैतत्फलासंभवात्। तेनैतन्मार्गप्र
पन्नानामेतादृशफलानुभववत्त्व १

मा ४

३९

पिएवंज्ञानेनचेत्सर्वथाप्रपन्नाभवंतितदेतत्फलानुभवएवंसे
स्यापितन्मादिति।ज्ञापितंभवति।ननुतद्रससंपूरितत्वंकथंज्ञा
यतेतत्राहुः।तत्कथाक्षिप्तचित्तस्तद्विस्मृतान्योव्रजप्रियः।प्रिय
व्रजस्थितिःपुष्टलोकान्तरिहःप्रियः॥२८॥ ॥तल्लीलाकथा
यामेवासमंतात्क्षिप्तंउत्क्षिप्यधृतंस्थापितंचित्तंयेन॥एतेनाऽ
न्यावयवानामन्यत्रव्यवहारेपिचित्तंतत्रैवतिष्ठति॥ननुकदा
चिदन्यत्रगच्छतीतिभावः।एवंसतिनिरंतरंतत्कथाकथनेनत न ४
द्रसस्वरूपादेवपूर्वोक्तलीलारसोबहिःप्रकटोभवत्येवेतिस
र्वेषांपूरितत्वमपिज्ञातंभवति।ननुनिरंतरंकथाकथनेप्यन्य
स्मरणेनकदाचिच्चित्तविक्षेपादिकंभवेत्तत्राहुः।तद्विस्मृतान्यइ

३९

तिः॥तद्व्यतिरिक्तस्यस्मरणमेवनास्तीत्युक्तोविक्षेपसंभावना॥ए-
तेनजीवनमपिकथेवेत्यपिसूचितं॥अन्यथाजीवनसाधनस्यापि
विस्मरणेनतदभावाज्जीवनस्यसर्वथाबाधासंभवतीतितदभा-
वात्कथामृतमेवजीवनमितिज्ञापितंभवति।किंच॥विप्रयोगली-
लारसपूरितलेतन्नापतत्तानां।एतत्कथामृतमेवजीवनंभवतीति
भावः॥ननुकथाशब्देनतल्लीलाकथनं।कथ्येतिकथनमेवोच्यते॥
एवंसतिसर्वविस्मरणेसतितत्कथनंकेनसहभवतीत्यत्राहुः॥व्र- थ४
जप्रियः।व्रजस्थलीलासंबंधिनोभक्ताःप्रियायस्यएतेनते-
षामेतल्लीलासंबंधित्वेनप्रियत्वेनतैःसहैवपरस्परंतत्तदनु-
भूतलीलाकथनजनितपरमानंदरसभरेणसरसार्द्रत्वपूर्वकं

भवति १

कथनंनास्मेनसहेतिज्ञापितं॥तत्कथासंबंधित्वेनतेषांनविस्मर
णमितितद्व्यतिरिक्तानांसर्वेषांविस्मरणमित्यपिसूचितं।ननुरंत नि २
रंतैःसहकथनंतत्रस्थित्यभावेकथंभवतीत्यत्राहुः।प्रियव्र
जस्थितिरिति।तेननिरंतरंकथनंसंभवति।ननुनिरंतरंब्रजस्थि
तावेवकोहेतुस्तत्राहुः।पुष्टिलीलाकर्त्ता॥पुष्टिलीलायांरासादिलीलां
साक्षात्संबंधरूपांस्वयंकरोति।अत्रस्वस्यकर्तृत्वकथनेनस्वय
त मपिभगवान्तदधीनएवलीलांकरोति।एतानप्येतदधीनएवा
नुभावयतीतिभावुकःसूच्यते।तेनयथायथैतेषांरुचिस्तथातथैव।
करोतीतिज्ञापितं।तल्लीलानुवस्तुब्रजस्थित्यैवभवेब्रजएवकुत त २
त्वादितिनिरंतरंस्थितिरपि।ननुभगवान्तदधीनएवलीलांकरो

भ २

तीतिकथंज्ञायतेतत्राहुः।रहःप्रियः।एकांतमेव प्रियंयस्यात्म
त्वायंभावः।स्वप्रेष्टेमि लितेपि यथायथातद्भावजनितः।
तत्तदभिलषितप्रकारानुभवएकांतेभवति।तथांतरंगायाएक
स्यात्मापिप्रियसख्याःसमक्षंनभवतीतिरहस्यैव तादृशलीला
ले ५ करैतत्तत्प्रकारकानिर्वचनीयपरमरसानुभवेनभगवानप्य
तदधीनोभवति।तेनभगवतोपिरहएवप्रीयोभवति।।
।एवंसत्कृतयोःपरमरसानुभवेनभगवानपितदधीनोभ कर्तृत्वे.७
वतितेनभगवतोपिरहएवप्रियंभवति
~~[illegible]योःपरम~~ ति।भा
वः।एतेनैतदधीनत्वंस्पष्टमेवज्ञातंभवति।रहस्यैवस्थित्वेत

नन्वेतेतुसर्वदा।१

ल्लीलां कुर्वंति कदाचिद्भक्तानां तल्लीलाज्ञानेच्छा न वेत्तदा कथं पू
रयंति तत्राहुः। भक्तेच्छापूरकः सर्वाज्ञातलीलोँमोहनः।सर्वासक्तो
भक्तमात्रासक्तः पतितपावनः।२७। भक्तानां यद्यदभिलषितं तत्स
र्वं पूरयंति। ननु यदि भक्तेच्छां पूरयंति तर्हि भक्तानां संपूर्णलीला
ज्ञानं जातमेव भविष्यति तत्राहुः। सर्वाज्ञातलील इति। यद्यपि ते
भक्तमनोरथपूरणार्थं कथयंति तथापि तेषां सर्वा लीला ज्ञाता न
भवतीति सूच्यते। ननु कथितायामपि सत्यां ज्ञानं कथं न भवेत्त
त्राहुः। अतिमोहनः। कथने परममोहनरूपः। अयं भावः। क
स्यचिद्भक्तस्य सर्वात्मना प्रपन्नस्य सल्लीलाज्ञाने प्रचुरार्तिर्दृ
ष्ट्वा कृपया यत्किंचिल्लीलाकथनारंभ एव तद्रसभरजनितप

पवंते १

रमानिर्वचनीयस्वरूपेस्नेहेसौंदर्यदर्शनेनैवऽतिमोहिताभवंतिपु।
ष्टादीषन्मात्रकथनेनतल्लीलारसाब्धिबिंदावेवमग्नाभवंत्यतःपू सं २
र्णलीलाज्ञानंकस्यापिनभवति।यद्यप्येतेमोहनेनकुर्वंतितथापिभ नं ३
स्वरूपस्वभावादेवतद्भवतीति।ननुएतावत्ज्ञानंसर्वेषांकथंन
करोतितत्राहुः।सर्वासक्ताः।सर्वेषुपुष्टिमार्गीयव्यतिरिक्तेषुअप्रस
क्ताएवसर्वथास्नेहजनितासक्तिरहितएवेत्यतस्तानीषदपिनज्ञा
पयंतीतिभावः।ननुएवंयथासाधनेफलदानेकिमप्यसाधारत्वं ण ४
भवतितत्राहुः पतितपावनः।सर्वसाधनशून्यानांप्रत्युतनिषि
द्धाचरणपतितानामपिपावनः।स्वकरुणादृष्ट्यैवतान्पावयंती
ति।एतादृशानामपिपावनत्वेनासाधारणत्वंसंपन्नंभवतीति। करण १

ननुतर्हिम
र्यादामार्गी
यभक्तेषु
प्यासक्तत्वे
नतेषामपि
तन्मार्गीयफलानांभावात्तत्फलत्वंकथंभवेत्तत्राहुः भक्तमात्रासक्तइति यद्यपिसर्वेषुआसक्तएवतथापिपुष्टिमर्यादाभ
क्तमात्रेऽपीषदासक्तः तदपेक्षयाऽधिकपुष्टिस्नेहासक्तिमान्तेनतन्मार्गीयंफलंतेषांभवतीति भावः ४

४१ ज्ञापितं। ननु पतितानामपि पावनत्वेन यदि साधारणमेव फलं द
द्यात्तदा साधारणत्वमेव भवति नासाधारणत्वं तत्राहुः॥ स्वयमो
गान्नसंदृष्टहृदयांभोजविष्टरः॥ स्वीयैः पीयूषलहरिस्नावितान्पर
रसा सः परः॥२८॥ यदा स्वकरुणार्द्रदृष्ट्यापतितोनुतापयंति तदा ते पूता
भवंति ततः श्रीमदाचार्यस्वरूपं दृष्ट्वा श्रुत्वा वा एतद्यशो गायंति तदा
तद्गानेन सम्यक्प्रकारेण हृष्टानि उच्छ्वसितानि यानि हृदयरूपाणि
अंभोजानि। अंभोजस्वरूपत्वेन हृदये भक्तिरससरसत्वं द्योति-
तं। तत्र तान्येव वा विष्टरः आसनं उपवेशनं यस्य। अंभोजस्यास
नत्वकथनेन तेषां हृदये ब्रह्मरूपो भूत्वा निरंतरं भावसृष्टिमुत्पादय
तीति भावः सूचितः॥ एवं क्रमेण तद्भावोदयेनासाधारणं फलमपी ४१

भावानुत्पादयंतितत्राहुः यशाइतिनिरंतरंसाक्षा
त्भगवत्संबंधिभावोदयेनतत्संबंधा १

दद्यातीतिसर्वमनवद्यं। ननुकथंज्ञायते भावजानितप्रचुरार्त्तितापे
नजीवनाशाकलिसंपन्ने तदैवस्वयत्राः श्रीमद्लीलामहात्म्यरूपममृ तेषा २
तरूपंजाते तदवलंबनेनैव तज्जीवनास्थितिर्भवति।। तदा तत्स्वयत्राः
पीयूषलहरिनिःस्राविताः प्रवाहिताः तत्कानांऽप्रमेसर्वेरसायनंएत
द्व्यतिरिक्तंसर्वस्वतएवविस्मृतमित्यर्थः। स्रावितपदेनअन्यरसगंधो
ता ५ पिनस्थितः। एवंसर्वात्मनाप्रपन्नानां तद्भावोत्पादनेनैवजनवतीतिसू
चितं। ननुएतेषांसर्वरसस्रावकत्वंकथंतत्राहुः। परइति।। रसरू
पेषुसर्वोत्कृष्टोयतः। ननुकथंज्ञायतेसर्वोत्कृष्टत्वंतत्राहुः। लीलामृ
तरसार्द्रीकृताखिलशरीरत्वात्। गोवर्द्धनस्थित्युत्साहसद्धाला
प्रेमभरितः।।२।। यथामहासमुद्रपूरोयदावर्द्धतेतदासर्वंस्त्रा।

वयित्वास्वरसेनैवसर्वंमग्नंकरोतिपुनःपुनःपूरवृध्यातत्राऽऽर्द्रता
कदापिन गच्छति॥तथातत्रतादृशलीला मृतरसोऽब्धिपूरवृध्या
सर्वप्लावनेनाऽऽर्द्रीकृताःसमस्ताःशरीरमनःस्वकीयायेनेऽप्याऽऽर्द्रप
दस्यद्विरुक्त्याएकलीलारसामृतेनाऽऽर्द्रत्वएवतदैवान्यलीलारसेन
पुरौनैर्द्रीभवंति॥एवमनेकाःलीलाःतत्तल्लीलामृताब्धिपूरेणस
र्वदाऽऽर्द्राएवतिष्ठं तीतिज्ञापितं॥यथासमुद्रस्यैकतरंगेणाऽऽर्द्रता
यांविद्यमानायामेवद्वितीयस्तरंगःआयातितेनसर्वदैवाऽऽर्द्रतात
त्र तिष्ठतितथात्रलीलामृतसमुद्ररूपंश्रीमदाचार्यस्वरूपंतत्र
तदमृतपूरेप्रवृद्धेकघनधारातरंगाइवतत्तल्लीलानावाऽऽगच्छं
तितत्र रंगरूपैस्तैःपुनःपुनःसर्वदाऽऽर्द्राएवतिष्ठं तीतिभावः।एवंस

यद्वातद्रसार्द्रीयेजाताःस्तेसन्धाकृताःपवित्राःशरीरजातायेनेतिपरंपरयारसस्यमहत्त्वं
सूचितंअत्रशरीरजदितिपदेनशरीरमात्रमेवसाक्षात्फलानुभवेव्यवधायकंनान्यदिति

निरंतरंतत्प्रेमरसपूर्णएव ४

निसर्वोत्कृष्टत्वंसर्वप्रभावकत्वंचस्पष्टीकृतं।ननुकदाचित्तल्लीला
मृतेनसर्वेषामार्द्रीकरणादस्यैसंन्यूनताभवेत्यथापर्वोपरमेस
मुद्रस्यतितत्राहुःगोवर्द्धनस्थितातितस्यांतयावोत्साहोमानसोल्ला
त सोयस्येतिँन्यूनताभावःसूचितः।ननुतत्रस्थितोमानसोल्लासिस
तिकथंन्यूनताभावस्तत्राहुः।तल्लीलाप्रेमक्षरितः।निरंतरंतत्प्रेमरस
व ५ पूर्णएव॥अयंभावः।यदाश्रीगोवर्द्धनोद्धरणंकृतंतदाहर्वेंतुवयंवनौ
कसस्तातनित्यंशैलनिवासिनइतित्रवेगेवच्छंतश्रीगोवर्द्धन
वन ४ महोत्सवजनितपरमानंदरसतरेणार्णएवनक्राःपुनरिंद्रकृ
तवर्षानंतरंपरमाश्चर्यरूपश्रीगोवर्द्धनोद्धरणेनकेवलस्वकी
यत्वराज्यदानेनसकलनक्रसमाजेएकत्रेवमिलितेपुनस्तत

४२

उक्त निःस्नेहत्वजनितपरमानिर्वचनीयरसामृताब्धिपूरो-
च्छ्वासतरलीकृतस्वकटाक्षामृततरंगविलासेरत्यंतमतिवि-
क्लवेनार्द्रीकृता: पुन: स्वस्वमनोरथपूर्वककोटीकंदर्पलावण्या-
धिकमाधुर्यश्रीमत्तत्तदंगस्पर्शप्रोच्छलनतादृशारसोविकासित-
श्रीमुखावलोकनस्पर्शादिलीलासुखजनितपरमरसामृतेनार्द्री-
कृता: पुन: श्रीमति गिरौ यथास्थानेल्लते भगवति तादृकस्ने-
हेनैवार्त्राद्यादिकरणे जलादिकं वारयित्वा तत्स्थानेन परमो-
नंदिता इत्येवं तल्लीलाप्रेमपूर्णा जाता यथा तथा चार्याणाम-
पितल्लीलामध्यपातित्वेनैव तादृशाप्रकारकलीलाप्रेमपूरि-
तत्वमुक्तं। यद्वा। अत्र पूरितपदं इतश्चत्स्यांतंज्ञेयं। तदा तल्ली ४२

सं २

सापदेनगोवर्द्धनियालीलाःकृतास्तासर्वाएववाच्या।ननुकेव
लंगोवर्द्धनोद्धरणसामयिकाएव।एवंसतितास्तारासादिपर्यंता
लीलास्तासांप्रेमजनिताप्ररास्तेंजातायत्रतद्भक्ता इत्यर्थःसंपन्नाः।
एतेनयथातरंगाःसमुद्रएवोत्तिष्ठंतिबहिर्गत्यसर्वत्रार्द्रीकृत्वापु
नःसमुद्रएवतिष्ठंति।तथाचार्याणांलीलाप्रेमपूरसंजाततत्क
थनेनतद्रसपूरास्तरंगाःकथानवाराबहिर्निसृत्यस्वकीयाना
र्द्रीकृत्यपुनस्तत्रैवतिष्ठंतीतिसूच्यते।तेनाचार्याणांलीलास
मुद्रत्वंनिरूपितंभवति।यथासमुद्रतरंगयोरेकरूपतातथै
तत्स्वरूपतज्ज्ञानरसभावयोरपीतिसूचितं।तेनागाधत्वंसु
र्वदावेसत्वंतिष्ठंतीत्युक्तं॥एवंसतिनकदापिरसन्यूनता॥

तत्रैवस्थितत्वाएतद्रसानुभवोभवतिनान्यत्रेत्यतएवोक्तं।
सोपीतिसर्वमवदातं १

र्सि ४

राज्यमेवभक्तानांसंपादितवंतद्दूतिकथंज्ञायतेअसाधारणज्ञापकाभावात्त
त्राहुःयज्ञभोक्तेतियथाभगवान्स्वीयानांकेवलस्वीयत्व ३

एवंलीलामृतरसार्द्रीकरणेनाचार्यैःस्वीयानांकेवलस्वीय-
ताराज्याभिषेकएवकृतइतिनिगूढाशयोपिज्ञापितइतिभावःननु
एवंकेवलस्वीयत्वसंपादनार्थमेवेंद्रयागभंगंकृत्वाश्रैलयागेरचिते
श्रैलोस्मीतिसाक्षात्स्वयमेवभुक्तवान्तथाचार्याणांतदास्य
रूपत्वेनयज्ञभोक्तृत्वकथनात्स्वीयानामपितत्संपादनार्थंतत्स स्वीयत्व ५
मर्पितपदार्थानांभोगंस्वयंसाक्षादेवकरोतीतिज्ञाप्यतइतित राज्यत्व ६
^तेषां ४ त्वमपिसंपद्यतइतिभावः।ननुजीवसमर्पितानांभोगंकथंकु
र्वंतितत्राहुः।यज्ञकर्ता।यथासर्वंत्याजयित्वातेषांकेवलंस्वी
यत्वसंपादनायस्वयमेवश्रैलयागकर्तास्वयमेवभोक्ताजात-
स्तथात्रश्राचार्याणांतदास्यरूपत्वेनश्रीनंदादिषुइंद्रयाग

निवृत्तिपूर्वकशैलयागकर्त्तास्वयमेवप्रोक्ताजातस्तुपात्रत्राचा
र्याणांतदास्यरूपत्वेनश्रीनंदादिषुइंद्रयागनिवृत्तिपूर्वकंशैल
यागेकरणार्थंभगवदुक्तायावाक्तद्रूपत्वाद्यागकर्त्रीतिनामक
थनाद्युक्तानांकेवलंस्वीयत्वसंपादनोयसर्वस्वार्पयित्वाफल
रूपसेवाकरणोपदेशोतत्रतत्स्वीयसंपादितपदार्थानांसमर्प
णप्रकारोपिस्वयमेवोपदिष्टःतेनैवतत्कर्तृत्वमतःस्वकृतत्वा
देवसाक्षात्स्वयंप्रोक्तापिप्रवृत्तिः॥तदुक्तं।अप्रज्ञातज्ञोपिकेत्रा।
इति।तदुदितनिजकृतइति।तेनसाधनफलयोरपिऐक्यंव्र
पितं।एवंस्वीयानांसर्वप्रकारेणस्वीयत्वंसंपाद्यपश्चाल्लीला
मृतरसेत्फक्तप्रकारार्द्रीकरणेनतदाज्ञया।निषेकएवकृत

चतुर्वर्गसाधकधर्माणामपित्यागेनतदुक्तंफलंनजनिष्पती
तिचेत्तत्राहुःचतुर्वर्गविशारदइतिपुष्टिमार्गीयाणांमर्यादामार्गीयचतु
र्वर्गस्यफलत्वाभा
वात्पुष्टिमार्गी
य ३

इतिभावः।एतत्सर्वंश्रीमदग्निकुमारैरेवप्रकटितमितिस्वा
खुनवएवोक्तइतिज्ञायते।ननुसर्वात्मनास्वीयत्वसंपादने
सर्वत्यागस्यकृतत्वेनचतुर्वर्गदानेविशारदः।अतिकोवि
दःसमर्थइत्यर्थः।पुष्टिमार्गीयचतुर्वर्गस्तुपुष्टिमार्गेहरेर्दा
स्यंधर्मोऽपिहरिरेवहि।कामोहरेर्दिदृक्षैवमोक्षःकृष्णस्यचेद्ध्रु
वमिति।एतद्दानंतुकेवलस्वीयत्वेनैवभवति।नान्यथेतित
त्संपाद्येदंफलंदत्तमितिभावः।ननुकदाचिन्नदद्यात्तत्राहुः॥
सत्यप्रतिज्ञः।येएवंप्रपन्नास्तेषामेतत्फलदानेसत्याप्रतिज्ञा
यस्य।नतुकदाप्यसत्या।एतेनावश्यंददात्येवेतिसूचितं।यथा
व्रजवासिनांकेवलस्वीयत्वंसंपाद्यपुष्टिचतुर्वर्गदानेनसत्य

फल १

प्रतिज्ञत्वं भगवतस्तथैव तेषामपि तद्रूपत्वेन स्वीयान्प्रति तद्दानार्थं सत्यप्रतिज्ञत्वमेवेति भावः। नन्वेवं प्रतिज्ञासत्यैवेति कथं ज्ञायते तत्राहुः। त्रीगुणातीतः। प्राकृतगुणत्रयातीतः॥ अलौकिकगुणपूर्णः। अलौकिकं सर्वं सत्यमेवेति सुष्ठूक्तं॥ सत्यप्रतिज्ञ इति। ननु गुणातीतत्वं कथं ज्ञायते तत्राहुः। नैयविशारदः। नयोत्रिगुणातीतालौकिकमार्गे विशारदः विशिष्टा शारदा सरस्वती यस्य। एतेन या वाणीमुखान्निःसरति सा स्वमार्गीयनयकथनरूपा अलौकिकानंदरूपैव निःसरतिइति गुणातीतत्वमेव ज्ञापितं। ननु नयकथने को हेतुस्तत्राहुः॥ स्वकीर्तिविवर्द्धनस्तत्वसूत्रभाष्यप्रवर्त्तकः। मायावादाख्यतूल

नीति

ˇत्रिजगतिस्वमाहात्म्यख्यापनार्थमेतत्करणमु ४

४६

ग्निवेश्मवादनिरूपकः॥३३॥ अयंभावः। नयस्तु मार्गगमनप्रति
बंधकः। तेनस्वीयानांस्वमार्गीयनयोपदेशेनोन्मार्गगमनान्निवा
त्फलसंसुख मार्गप्रापणेन च शीघ्रंफलंभवतुंतः स्वकीर्त्तिरपि
तत्रवर्द्धतइतिˇ उक्तंस्वकीर्त्तिविवर्द्धनइति। ननुस्वमार्गीयैःसत्प्रमा
णसंमतैर्यदिनवेदाकीर्त्तिः^कथंनविष्यति तत्राहुः। त्वेवेति॥
नत्वसूत्राणिनत्वरूपाणिसूत्राणिव्यासकृतानितेषांभाष्यप्र
दर्शकः। एतेनस्वोक्तनयेव्याससूत्राणिप्रमाणमुक्तंतेनतत्सं
मतमप्युक्तं। ननुव्याससूत्राणांभाष्यंशंकराचार्यादिभिःकृतमे
वन्नवद्भिरपिपुनःकृतंतत्रकोविशेषस्तत्राहुः। मायावादाख्ये
ति। आख्यापदेनमायावादेतिनाममात्रंस्थापितंस्मकर्त्ता

ˇभविष्यतिश्च
^न्यथा ५

नयस्तु ४

४६

तैर्मायावाद एव निरूपितः॥ एभिः सदूषित इत्ययमेव विशेषः॥
ननु तं विदूष्य स्वयं किं स्थापितं तत्राहुः॥ ब्रह्मवादनिरूपकः॥ स
र्वं ब्रह्मैवेति सर्वस्यापि तत्त्वं स्थापितं। ननु सर्वस्य ब्रह्मात्मत्व
निरूपणेपि फलं किं दृष्टं निरूपितं तत्राहुः। अप्राकृताखिला
कल्पभूषितः सहजः स्मितः॥ श्रीलोकाभूषणं भूमिभाग्यं सहज
सुंदरः॥ ३२॥ अप्राकृता अलौकिका अखिला आकल्पाः स
कलशृंगाररचितो रमणीयवेषा भगवतः स्वरूपास्तैर्भूषि
तः॥ अयं भावः॥ तत्वसूत्रभाष्यस्य चतुर्थाध्याये स्वमार्गीयफ
लस्य साक्षाद्भगवत्स्वरूपस्य संबंध निरूपणात् तत्र तत्र श्रीसा
रसभरेण येये भावा उत्पद्यंते तेन तद्भावानां भूषणाभूषणांग

स ३

ति १

रूप १

स्यापि प्यरोचिताधिकमित्फलत्वात्परमशृङ्गारा रूपत्वभगवतो
रूपत्वेनतत्रापियादृश्यस्यविलक्षणाभावाः ऽनेकविधास्ता
दृश्यसविलक्षणशृङ्गाररूपत्वाद्भगवतोप्यनेकवेषत्वेनचआ
चार्याणांतत्तद्भावरूपत्वेनतत्तन्निरूपणेनचमहात्मकतायां
त्ततद्भावरूपभगवत्स्वरूपस्यतत्परमशृङ्गारोल्लासेनाचार्य
स्वरूपमपिसकलशृंगाररमूलीयःरसोद्दीपकःपरममाधुर्य
सीमायोनवीनवेषत्वेनभूषितंभवतीतितादृशस्वरूपस्य
स्वस्यैवानुकृतत्वात्तत्तुनिरुकंऽप्राकृतेति।ननुभवद्भि
रनुकृतमित्युक्तमन्यैःकथंज्ञायतेतत्राहुः।सहजःस्मितः।
सहजंस्वाभाविकं।तत्तद्भावेनसहजातंचइषत्स्मितंयस्यत

भवित्वात्तद्रसानु १

वि२ तद्रसानुभवेन तद्रसभरजनितानंदपूरेण नाद्वत्रापद्मदला
यतलोचनेषु अपरेषु सर्वदा हास्यामृतं तिष्ठत्येव तेन स्वीयां
तरंगानां ज्ञानं भवतीति भावः। एवं सति सर्वदा व्यरोचत नाधिक
मित्युक्त्वा विशिष्टशोभारूपभगवद्भावात्मकभूषणभूषितमित्यु
क्तं। किंच। केवलं स्वयमेव न भूषितः। किंतु अन्येषामपि भूषणरू
पो भवति तत्राहुः। त्रिलोकीभूषणं। त्रयाणां लोकानां समाहारः।
अत्र त्रिलोकपदेन भगवान् भक्ताः श्रीम‸चार्याउच्यंते तादृश ‸दा ४
लीलासमये एतत्त्रयाणामेवावलोकनात् तस्य भूषणं। अ
त्रायं भावः। भगवता हि भक्तानां स्वानंददानार्थं तद्वारा स्वयं त
त्र संभोगार्थं तादृशो शुद्धरसात्मकं स्वस्वरूपं प्रकटीकृतं। ली
यतास्मिन्नेव परस्परमा
लोकं ज्ञानं वारसात्मकतद्योति
भावः ४

पूर्वोक्तमन्त्रद्रावकरूपत्वेन लीलाद्विशिष्ट
तत्वा ३

मानादिजनिता दूत्यपि प्रतिभाति १

स्यायांतुतन्नतत्क्षणेरसमनखशेणप्रियाणांमांस्वादंजनितानन्त्र
ज्ञावविशेषाउत्पद्यते। तदातादृशोबुद्धरसात्मकत्वेनक्षणमा
त्रमपितदंतरायासहिष्णोः स्वप्रभोस्तदेवंतत्तत्प्रकारेणतत्सं
योजनसमर्थाऽपिचार्यमूर्त्तिरेवेतितदातत्करणात्तत [illegible]
त्संधजनितानंदमरोद्भासेननवीनाकापनेअपूर्वशोभालं
कृतिर्भवतिप्रभोः। साचआचार्यकृतैवेतिआचार्याणामेव
भगवद्भूषणत्वंसंपन्नमितिभावः। तथैवतादृशभक्तानामपि
तादृशरसात्मौपिपामिलेन। नातः समाहितेनतदंगसंगानं
दरसजनितानवीनैवषट्श्रमासौभाग्यत्वंकृतिसंपत्तिर्भव
ति। साप्येतत्कृतैवेत्याचार्याणांभक्तभूषणत्वमपिसंपन्नं। किं

प्रियां

वं

क३

समीहनेन २

नं१

चामिलन्नांतरमुभयोस्तादृशसभरोन्मीलत्प्रतिक्षणनवनवानं
दानुभवकरणेनास्याचार्यवृत्तित्वेनमन्यमानयोः।आचार्येषुत
त्समोपकारकरणाऽसमर्थत्वेनपरमप्रेमभरेणात्मसमद्वंद्वयोर्ने
त्रादिभूषणमितिप्रेमास्पदद्वंद्ववचनादिलालनविलासेनापु
भयोर्भूषणंतथैवाचार्याणांउभयोस्तादृशलीलारसानुभवेन
स्वकृतेप्रभुप्रसन्नताजनितानंदभरेणचतत्तल्लीलारससंवलि
ततत्स्वस्वरूपद्वयस्यैवबाह्याभ्यंतरस्फूर्त्याकेवलतदात्मक
ताजनितनवीनालोकिकसुखमयाद्भुतविलक्षण
त्वात्स्वस्यापिभूषणं।एवंत्रिलोक्याःभगवतोभक्तानांस्वस्या
पिभूषणमित्यर्थसिद्धमितिभावः।यस्याभूषणेननवाशोभा

यद्वा त्रिलोकीपदेन तत्तद्गुणविलक्षणाभाववंतः स्वीयास्तेषां तत्तद्भाववदानेन त्रि
प्रसंगजनितपरमशोभाकरणत्वेन स्वयमेव भूषणं भवतीति स्वानुभ
ववेद्यं

भवति तथा तज्जसानुभवेन परमाशोभा भवतीत्यर्थः। त्रिलोकीभू २
षणमिति किं च। न केवलं तेषामेव भूषणं किंतु तद्भूषणरूपत्वे
न भूमावपि महत्सौभाग्यं भवति॥ तत्राहुः। भूमिभाग्यं। तदाधारभू
ताया भूमेर्भाग्यरूपमेव। अयं भावः। भक्तानां लीलोपयोगिदेह
प्राप्तिस्त्वाचार्यचरणसरोजसंबंधिरजसैव भवतीत्याचार्यस्थि
त्यातच्चरणारविंदस्पर्शाद्भूमिरधूनामञ्जसा भक्तानां लीलो
पयोगिदेहो भविष्यति तदा ममापि तल्लीलासंबंधो भविष्यती
ति तत्स्थितिं स्वभाग्यत्वेनैव मनुत इत्यर्थः। भूमिभाग्यं॥ नन्वी
दृशा भूषणाकृता शोभा कदाचित्सर्वदा न तिष्ठेत्तत्राहुः॥ सहज
सुंदरः॥ तादृशं सौंदर्यं सहजमे न तु कदापि गच्छतीति सूच्य

वन तु कदाचिदागंतुकं किंच सहजपदेनागंतुकमपि सौं
दर्यं प्रज्ञातं तथैव सर्वदा तिष्ठति १
तं

तोन तु सर्वमुक्तं भक्तानां स्वीयोपयोगि देहप्राप्तिराचार्यच
रणसंबंधिरजसा भवतीति कथं ज्ञायते तत्राह ॥ अशेषभ
क्तसंप्रार्थ्यचरणाब्जरजोधनः ॥ इत्यानंदनिधेः प्रोक्तं नाम्नाम
ष्टोत्तरं शतं ॥३३॥ अशेषभक्तैः सम्यक् सर्वं विहाय प्रार्थ्यमिद
मेवेति संप्रार्थ्यं चरणाब्जरजोरूपमेव धनं यस्य स तस्माज्ज्ञात त ५
मपि भवति । किंच । स्नेहरसरूपरजः प्रार्थितेनाचार्यदत्तेना
दृढरजोलाभेन तादृशसंभवेन तादृशलीलासंबंधिपरमा
नंदानुभावादाचार्याणां त्रिलोकीभूषणत्वं भूमेर्भाग्यरूपत्व
मपि संपन्नमेवेति सर्वमवदातं ॥ एवं सर्वप्रकारेण ष्टोत्तर
शतनामभिरानंदनिधिरूपत्वं निरूप्योपसंहरति । इत्यानं

५०

दृति

द निधेरिति॥ एवंप्रकारेण स्वरूपतः साधनतः फलतः आनंद
निधेस्तस्य समुद्रस्याष्टोत्तरं नाम्नां शतं मया प्रकर्षेणोक्तं। इत्यानं
द। निधेरित्युक्त्वा एतानि नामानि प्रत्येकं आनंदनिधिरू
पाण्येवेति ज्ञापितं। यथा समुद्रतरंगयोर्न भेदस्तथात्रापि। य
ह था वा निधौ कानिचिल्लानि बहिर्निर्दर्प्यंते स्वस्मिन्नलंक्रियंते॥ श्काश्य ५
नै तावता तेभ्यां भिन्नत्वं भवति किंतु तानि निधिरूपाण्येव॥
तथात्रापि नाम्नां एकत्वेन कथनेपि न तद्भिन्नत्वमिति भावः।
निधिपदेन निधौ यत्रैव युक्तो न भवति तत्रैव किंचित्प्राप्नोति
तथाचार्येषु यथाकथमपि युक्तो ह्यानंदमेव प्राप्नोतीति भ ५०
वः॥ अत्रोक्तौ प्रकर्षकथनस्या यं भावः। अत्रानंदसमुद्रवो

त्वार्थं यथा समुद्रस्य तरंगा अनंतास्तथा नामान्यप्यनंतानि। परंत्व
तिगोप्यानि परमरहस्यरूपाणि तेषु मध्ये तानि प्रकर्षेण रसपरव
शात्वोत्कर्षेनोक्तानि॥ नतू प्रकाररूपत्वेन। तदपि स्वकीयानामर्पेना
न्येषां। अन्यानि यथास्थितानि तानि नोक्तानीति मस्वचितं। किंच। ए
तेनैतन्नाम्नामपि यथास्थितानामेव व्याकर्णं न तु कस्यापि त्वाक
ल्पनमित्यपि ज्ञापितं तेषामन्त्रत्वोपि स्वस्यैवेत्यपि सूचितं। एवं
स्तोत्रं निरूप्यास्य पठनप्रकारमाह॥ श्रद्धाविशुद्धबुद्धिर्यः पठत्य
नुदिनं जनः। स तदेकमनाः सिद्धिमुत्कं प्राप्नोत्यसंशयः॥२५॥
श्रद्धया विशेषेण शुद्धा बुद्धिर्यस्य श्रद्धयाशुद्धे अयमेव विशेषः यः पु
घत्र यादृशं नामोक्तं तत्र तादृशरूपत्वेनैव सर्वात्मना स्फूर्ति

भवेदिति।एवंसर्वंश्रद्धाविशुद्धबुद्धिर्भवेत्पश्चात्तदेकमनास्तन्ना
मनिरूपितलीलाविशिष्टस्वरूपएवमनोयस्याएतादृशःसन्पठ
तितदष्टकंदिनंनिरंतरं।तदाउक्तांकृष्णाधरेत्युक्तांसिद्धिंप्राप्नोति
सर्वथात्रनसंदेहः।अत्रासंशयपदस्यायंभावः॥आचार्या
णांसाक्षात्श्रीकृष्णस्यस्वरूपत्वेनतत्तल्लीलाविशिष्टस्व
रूपस्यानुभवात्तदासख्याश्रीकृष्णाधरामृतास्वादसिद्धिर्भवे
द्भ्रमरकीटन्यायेनेतिस्वानुभवादेवोक्तेनसंशयइति॥ननु
तर्हिएतत्सिद्ध्यनंतरंमोक्षोभविष्यतितत्राह॥तदातोषपा
मोक्षस्तदातोतद्वतार्पता॥अतःसर्वोत्तमंस्तोत्रंजप्यंकृष्णरसा
त्मभिः।२५॥अतःमोक्षादपिसर्वात्मनाउत्तमंसर्वेषुस्तोत्रेषुवा

इदमेवोत्तममिति सर्वोत्तमस्तोत्रमिदं जप्यं ॥ अतिरहस्यत्वेन स्व-
हृदय एव जप्यं। केचित्तु पिच्छायामाहुः ये कुलरसास्वादिनस्तेः तैः सह
वा पठनीयमित्यर्थः। एतेनैतद्रसानभिज्ञेषु सर्वथा न प्रकाशनीय-
मिति ज्ञापितं कुलरसार्थितोक्ता उद्भूततद्भावानामेवाधिकारो ना-
न्येषामिति सूचितं ॥ जप्यत्वकथनेनेयमाप यथा जपति तथा तर्प-
णावोद्रेके एतद्रसस्वभावेन परमनिगूढत्वेन तत्तद्गुप्तनववधूवत्कि-
स्वहृदय एव जप्यं न वर्तिन तु कस्यचिद्देरेक पथितुं शक्यं नव-
नीतिभावः। न सा धनं न निष्ठा च न धर्मः कोपि वक्तीति ॥ तथापि।
हि तदुक्तार्थविचारे यत् स्थितं मनः। तदेकमेव परं तत्त्वकारणं
तत्कृपेक्षणं ॥ तद्विचारोत्थितभावाः परमानंददायिनः ॥ श्री

नूदितामया त्वंतः कृष्णवो दृष्टयंतु तान्॥२॥ अयोग्येयमपि संन्नु
ताइति सत्विन्नु संशयः॥ तत्संज्ञायं तत्वतः ॥३॥ दोषैरेव निरस्य
तु॥४॥ यद्यपि ह्लतं बाल्यंमूढेन तदपिस्खलः॥ तथात्मस्मात्कृत
लिन दमंतु प्रनवो मम॥५॥ श्रीमदाचार्यचरणाः श्रीमान्श्रीवि
ठ्ठलप्रभुः॥ तदीयास्तद्रसार्द्रा येवाशरणं ममते सदा॥६॥ इति श्रीम
द्विमलेश्वरप्रकटितं सर्वोत्तमस्तोत्रं संपूर्णं॥ हरिनक्रीक्रस्तु॥ ॥

५२